1048

सि[illegible]न्त कौमुदी [illegible]धूक सिर वर्णान [illegible]

13" X 5·5"

सिद्धान्त कौमुदी
अव् सन्धिप्रयत्ना

पत्र 14

(ब)

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सि·कौ·सरी· ६० श्रीगणाधिपतयेनमः ॐनमः सर्वमंगलमूर्त्तये श्रीविश्वेशाय ध्यायंध्यायंपरंब्रह्मस्मारंस्मारंगुरोर्गिरः सिद्धांतकौमुदीव्याख्यांकुर्मः
१ प्रौढमनोरमाम् १ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

श्रीगणेशायनमः मुनित्रयंनमस्कृत्यतदुक्तीःपरिभाव्यच वैयाकरणसिद्धांतकौमुदीयंविरच्यते १ ॥श्री॥ ॥श्री॥

श्रीगणेशायनमः नत्वाविश्वेश्वरंसांबंकृत्वाचगुरुवंदनं सिद्धांतकौमुदीव्याख्याक्रियतेतत्त्वबोधिनी १ विघ्नविघातायकृतंमंगलंशिष्यशिक्षायैनिब
ध्नन्चिकीर्षितंप्रतिजानीते मुनित्रयमित्यादिना त्रयोऽवयवायस्यतत्त्रयंसंख्याया अवयवेतयप् द्वित्रिभ्यांतयस्यायज्वा मंतारोवेदशास्त्रार्थतत्त्वावगंता
रोमुनयः मनेरुच्चेलोपश्चेत्यौणादिकसूत्रेणमनेरुतउकारः मनेः परइन्प्रत्ययश्च गुणस्तुनेह भवतिकिदित्यनुवर्त्तनात्तपरकारणाद्वा तेषांपाणिनिकात्यायनपतंजली
नांत्रयंमुनित्रयं ननुस्वयंभुवंनमस्कृत्येत्यत्रेवात्रापिनमःस्वस्तीत्यादिनाचतुर्थीस्यात्मैवंउपपदविभक्तेःकारकविभक्तिर्बलीयसीतिवक्ष्यमाणत्वान्नमस्करोतिदेवा
नितिवद्द्वितीययाएवयुक्तत्वात् किंचनहत्वार्थाद्धन्निरितिपत्तेनमःशब्दस्यात्रनिरर्थकत्वात्तद्योगेचतुर्थीनभवति अर्थवद्ग्रहणपरिभाषायाःप्रवृत्तेः स्वयंभुवेन
मस्कृत्येत्यत्रतुस्वयंभुवमनुकूलयितुमित्यर्थविवक्षायांक्रियार्थोपपदस्येत्यादिनाचतुर्थीतिमूलएवस्फुटीभविष्यति नचैवंनमःस्वस्तीतिसूत्रेनमःपदमर्थमि
तिग्राकाहरणेनमस्यत्रहीमनुकूलयितुमित्यर्थःविवक्षितेसंबंधसामान्येषष्ठ्याप्राप्तायांतदपवादतयातस्यावश्यकत्वात् तदुक्तीरिति तेषांपाणिन्यादीनाम्
क्तीःसूत्रवार्त्तिकभाष्याणीत्यर्थः तस्यमुनित्रयस्योक्तीरितिव्याख्यानेमुनिसमुदायेनसूत्रवार्त्तिकभाष्यवानोक्तमितिसमुदायिनांमुनीनामेवोक्तीरितिपर्यवस
ति परिभाव्येतिपर्यालोच्येत्यर्थः नचपरिपूर्वस्यभवतेस्तिरस्कारार्थत्वात्कथमत्रज्ञानार्थतेतिशंक्यं परीत्यस्यभावीतिचुरादिणिजंतस्ययोगात् केचित्तुभवतिनायो
गम्यपुंचेत्याप्याहुः परोभुवोवज्ञाने इतिसूत्रेपरोभुवइत्यस्यावज्ञानइतिविशेषणान्नतिरस्कारार्थत्वनियमः मनसापरिभाव्यकंचिदित्यादिप्रयोगाच्च अतएवा
त्राप्रयुक्तत्वदोषशंकापिनास्तीति अन्येतुअनादरःपरिभवःपरिभावस्तिरस्क्रियेतिकोशात्परिपूर्वकाद्भवतेर्घञंताद्भवतिरस्कारप्रतीतेर्निग्रस्माद्दित्याशंकेवात्रनास्तीत्य

ऽः तन्नंदर्पणिजयपरिभवतीत्यत्रापि तिरस्कारप्रतीतेः वैयाकरणेतिव्याकरणमधीयते
विदंतिवावैयाकरणाःतत्सिद्धांतानांकौमुदीवप्रकाशिकेत्यर्थः निर्दुष्टसकलजनाह्लादक
त्वसाम्येनकौमुदीशब्दप्रयोगः करिष्यमाणायाश्चपिकौमुद्यावुद्धौसंनिधापितत्वादिय
मितिपुंल्यानिर्देशःविरच्यतइतिमयेतिशेषः रचप्रतियत्नप्रतियत्नगुणाधानविपर्ये
दस्माद्वर्त्तमानसामीप्येनविष्यद्वर्त्तमानप्रत्ययः १

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

हयवरट् हकारोपदेशः अहः अशः हशः इण्ग्रहणेषु हकारग्रहणार्थः अर्हेण अह्नवा येपीति णत्वं देवा हसंति नो नगोऽ इति रोर्यत्वम् देवो हसति ह शि चेत्युत्वं लि
लिहिषु लिलिहिध्वे विभाषेट इति वा ढः हल इदं सूत्रं वल रल इल शल्षु हकारग्रहणार्थं रुदिहि स्वपिहि रुदादिभ्यः सार्वधातुके इति वलादिलक्षण इट् स्निहित्वा स्नेहि
त्वा रलो व्युपधादिति वा कित्वम् अदाग्धाम् झलो झलीति सलोपः अलिक्षत शल इति क्सः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अइउण् ऋऌक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झभञ् घढधष् जबगडदश् खफछठथचटतव् कपय् शषसर् हल्
अइउण् णोनुबंधो ऽण्संज्ञार्थः ऋऌगिति ककारस्तु अक इक उक संज्ञार्थः एओङिति ङकार एङ्संज्ञार्थः ऐऔजिति चकारस्तु अच इच् एच् ऐच् संज्ञार्थः वर्णानाम् सं
दिग्धत्वेन वा धनाय संहितायाः अविवक्षणादेतेष्वसंधिः स्वराणां चादिषु पाठात् चादयोऽसत्वइति निपातसंज्ञायां निपात एकाजनाङिति प्रगृह्यत्वे प्रकृत्येति भावान्न संधि
रित्यनेन स्यादेतत् अकाराद्युपदेशेन यथा तत्सवर्णानामाकारादीनां लाभात्पृथगाकारादयो नोपदिष्टास्तथा ऋऌवर्णयोरपि सावर्ण्यादृकारोपदेशेनैवान्यसिद्धेः किं
पृथगुपदेशेन न च जातिपक्षे ऋऌवर्णयोः पृथगुपदेश आवश्यकस्तयोर्भिन्नजातित्वादिति वाच्यं सावर्ण्याद्वेकजात्युपदेशे जातस्तत्र स्यापि लाभात् ऋऌवर्णयोः प्र
त्येकं विंशतः संज्ञासिद्धये अणुदित्सवर्णस्येति सूत्रे अण्ग्रहणस्य जातिपक्षेप्यावश्यकत्वादिति चेत् अत्राहुः ऋऌवर्णयोः सावर्ण्यस्यानित्यतां ज्ञापयितुमुभयोरुपदेश
स्तत्फलं तु ऌकारस्याशिवायस्य ऌतः शिवाय स्तस्मादात्स्वो धनेऌ उपशिवे वितिष्ठुतः ऋऌवर्णयोः सावर्ण्यस्य नित्यत्वे तु अनंत इति पर्युदासादृकारस्येव ऌकारस्यापि प्लुतो
न स्यादिति समाधानान्तरमग्रोगुण इत्यत्र दर्शयिष्यते हयवरट् टानुबंधो ऽट्संज्ञार्थः हकारोपदेशस्तु अहः अशः हशः इण्ग्रहणेषु हकारग्रहणार्थः अर्हेण अड्व्यवायेपी
ति णत्वं देवा हसंति अत्र भोभगोऽ इति रोर्यत्वं देवो हसति हशि चेत्युत्वं लिलिहिषु लिलिहिध्वे विभाषेट इति वा ढः लण् णकारानुबंधोऽण् इण् यण् संज्ञार्थः ननु णितिद्व
चिन्तूर्वणकारेण गृह्यते इ चिन्तु परणकारेणेति तु परणकारेणैव तथा चेत्संदेहाय अनुबंधांतरमेवमेव कर्त्तुमुचितं सत्यं व्याख्यानतो विशेषप्रतिपत्तिर्न हि सं
देहादलक्षणमिति परिभाषाज्ञापनाय पुनर्णकारानुबंध इति स्थितमाकरे ञमङणनम् मकार इह अम् यम् ञम् ङम् संज्ञार्थः झभञ् ञकारो यञ्संज्ञार्थः घढधष् इति षका
रस्तु झष भष संज्ञार्थः जबगडदश् इति शानुबंधो अश् हश् झश् जश् बश् संज्ञार्थः खफछठथचटतव् इति तिस्रत्रे वकारस्तु छव् संज्ञार्थः कपय् इति यकारो यय् मय् झय् खय् चय् संज्ञार्थः श
षसर् इति रेफस्तु यर् झर् खर् चर् शर् संज्ञार्थः हलिति लकारस्तु अल् हल् वल् रल् झल् शल् संज्ञार्थः पुनर्हकारोपदेशास्तु वल रल झल शल्षु हकारग्रहणार्थः रुदिहि स्वपिहि रुदा
दिभ्यः सार्वधातुक इति वलादिलक्षण इट् स्निहित्वा स्नेहित्वा न क्त्वा सेडिति निषेधं बाधित्वा रलो व्युपधादिति वा कित्वं अदाग्धां घत्वस्यासिद्धत्वेपि हकारस्य झल्त्वात् झलो झलीति
सलोपः अलिक्षत शल इति क्सः ननु पुनर्हकारोपदेशः सावर्ण्यपक्षत्वेपि शर्मे ष्वेव हकारं पठित्वा अलोंत्यस्य हलोनंतराः संयोगः झलो[illegible] शल इगुपधेत्यादिसूत्राणि याव

तिलानुबंधनानि तानि अर्होस्य हरोनंतराः इत्येवरूपेण रेफानुबंधान्येव वक्त
व्या हलिति पृथक्सूत्रं त्यजतामेव तथा हि सति हर्हरिरित्यादिन सिध्येत तत्र खरवसा
नयोर्विसर्जनीयो वा शरीत्यादिप्रसङ्गादतो हलिति सूत्रमावश्यकमेव एवं च हलिति
सूत्रे अल्पमिति वक्ष्यमाणग्रन्थोपि स्वरसतः संगच्छते॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

हलंत्यंसूत्रेंत्यमितिहलि अंत्यमितिविग्रहेसप्तमीतियोगविभागात्सुप्सुपेतिवासमासइतिभावः यद्वाषष्ठीतत्पुरुषोऽयम् स्यादेतत् हलितिकेवलस्यैवतंत्रावृत्त्येक
शेषान्यतममस्तु हयवलइतिचव्याख्यास्यते सामीप्यषष्ठ्यर्थः यद्वा मास्तुतंत्राद्यिश्रस्तुसमाहारद्वंद्वः हल्चलचेतिलकारस्यसंयोगांतस्यलोपइतिचेन्नैवं आद्यस
मासस्यक्लिष्टत्वात् नहिब्राह्मणकंबलइत्यादौब्राह्मणसमीपवर्त्ती अन्यदीयःकंबलः प्रतीयते नवाचित्रगुशब्दात् चित्रगवीनासमीपवर्त्तीचित्रादिः प्रतीयते अत्र
एवअनंतरादिषुनसमासोऽनभिधानादितिस्पष्टमाकरे किंबहुना ब्राह्मणस्यकंबलः चित्रागावोस्येतिव्यस्तप्रयोगोपितत्रानिष्टः द्वितीयेपिसंयोगांतलोपादुल
भः यणःप्रतिषेधारंभात् तत्प्रत्याख्यानपक्षेऽपिफलोऽफलीतिफलग्रहणमपकृष्यसंयोगांतस्यफलोलोपविधानाच्च किंचिपदार्थबोधंविनावाक्यार्थबोधासं
भवेनहल्प्रत्याहारासिद्धेः वाक्यैतत्सूत्रार्थोऽबोधप्रसक्तेस्तदुद्धारोर्थयत्नः अस्यांचावस्थायांहल्शब्दार्थाप्रसिद्धौ द्वंद्वएवदुर्लभः सहविवक्षायाअसंभवात्
तस्माद्यथोक्तमेवन्याय्यं॥ ॥

इतिमाहेश्वराणिसूत्राण्यणादिसंज्ञार्थानि एषामंत्याइतः लण्सूत्रेऽकारश्च हकारादिष्वकारउच्चारणार्थः हलंत्यं हलितिसू
त्रेंत्यमित्यात्॥ ॥

अणादिसंज्ञार्थानीति अणादिसंज्ञाअर्थःप्रयोजनंयेषांतानीतिविग्रहः अणादिसंज्ञाप्यस्मानीत्यस्वपदविग्रहोवा अर्थेननित्यसमासोविशेष्यलिंगताचेति
वक्ष्यमाणत्वात् एषामंत्याइतइति एषांसूत्राणामंत्याणादयोहलइत्यनुवर्त्तमानेनसंज्ञकाइत्यर्थः अकारश्चेति अंत्यत्वात्पृथगुक्तिः वचनपरिणामेन
इदितिसंबध्यते इत्संज्ञाचास्यउपदेशेजनुनासिकइत्यनेन एवंचणादिभिरि द्वितादिरंत्येनेतिवक्ष्यमाणेनप्रत्याहारग्रहणादणादिसंज्ञार्थानीतियदुक्तंतत्स
गच्छतइतिभावः अकारउच्चारणार्थइति नतुलण्सूत्रस्याकारइवप्रयोजनार्थइत्यर्थः हलंत्यंअंत्यवअवसानेभवमंत्यं दिगादिभ्योयत उपदेशेजनुनासिकइदित्य
तउपदेशेइदितिचात्रानुवर्त्तते आदिरंत्येनेतिसूत्रेणसहायोन्याश्रयमाशंक्याव्यत्यासपरिहरति हलितिसूत्रेअंत्यमिति हलिअंत्यमितिविग्रहेसप्तमीतियोगवि
भागात्सुप्सुपेतिवासमासइतिभावः यद्वाषष्ठीतत्पुरुषोयंहलितिसूत्रस्यांत्यमित्यादितिव्याख्यानसंभवात्॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मध्यगानामिति आद्यंताभ्यामवयवाभ्यामवयवी समुदाय आक्षिप्यते तस्य चयुगपदुच्चारणप्रयोगाभावात्तदवयवेष्ववतरंती संज्ञा मध्यमेषु विश्राम्यति नत्वाद्य
तयोः संज्ञास्वरूपांतर्नीवेशनतयोः प्रत्यार्थ निर्णयादितिभावः स्वस्येति स्वरूपमित्यनुवर्त्तते स्वरूपंचादेरेवगृह्यते नांत्यस्य अंत्येनेत्यप्रधानतृतीयानिर्देशात् सर्व
नाम्नामुत्सर्गतः प्रधानपरामर्शित्वात् ॥ ॥

आदिरंत्येनसहेता अंत्येनेत्तासहिता आदिर्मध्यगानां स्वस्यचसंज्ञास्यात् इतिहलुसंज्ञायां ॥श्री॥ ॥श्री॥ ॥

आदिरंत्येनसहेता अंत्येनेतिकिं सुडितिप्रत्याहारस्तृतीयैकवचनावयवेटानमाभूदितिकाशिकाकृत् यद्यपिटकारांतसंघस्यटकारोप्यंत्यो भवतितथाप्यंत्ये
ए २ नेति ग्रहणसामर्थ्यादंत्यत्वप्रयुक्तायस्येत्संज्ञातेनैवप्रत्याहारः नहिटाटकारेहलंत्यमितीत्संज्ञाप्रवर्त्तते नचैवंरप्रत्याहारासिद्धिः लणसूत्रस्थावर्णस्यानुनासि
कत्वप्रतिज्ञासामर्थ्यादनंत्येनापिइत्साप्रत्याहारासिद्धेरितिकाशिकाकारादयः निर्द्धं परिल्लिहस्वौजसमौ इतिसूत्रेदर्शयिष्यते विस्तरस्तुशब्दकौस्तुभेनुसंधेयः उत
तिकिं रप्रत्याहारोयथास्यात् सहानुनासिकत्वप्रतिज्ञासामर्थ्यादनंत्येनापिगृह्यतइत्युक्तं नचैतद्वृत्तिकस्याविरहेलभ्यतइतिकौस्तुभेस्थितं अत्राद्यंताभ्यामवयवा
भ्यामवयवीसमुदायआक्षिप्यते तस्यचयुगपदुच्चारणप्रयोगाभावात्तदवयवेध्ववतरंती संज्ञामध्यमेषु विश्राम्यतिनतुत्वाद्यतयोः संज्ञास्वरूपांतर्भावेनतयोः
प्रत्यार्थनिर्णयादित्याशयेनाह मध्यगानामिति स्वस्यचेति स्वरूपमित्यनुवर्त्ततइतिभावः स्वरूपंचादेरेवगृह्यतेनांत्यस्य अंत्येनेत्यप्रधानतृतीयानिर्देशात् स
र्वनाम्नः उत्सर्गतः प्रधानपरामर्शित्वात् ननुस्वमित्यस्यानुवृत्तौकः संज्ञीत्याकांक्षायाः शांतत्वादवयवव्याप्तिपोनस्यात् तथाचकोयणचीत्यादाविकारस्यस्था
नेयकारः स्यादकारेपृइत्येवमर्थस्यात् मैवं आदेरेवंसंज्ञित्वंतु आदिरंत्येनेतिसंज्ञाकरणस्यैवपर्यवसन्नत्वात् किंच अण अक् अच अट् अम् अश दीनामयदि
र्द्दर्शोपिव्यर्थः स्यात्सर्वत्राकारस्यैवसंज्ञित्वादितिदिक् प्राहुकौस्तुभेतु आद्यंतावयवद्वारासमुदायानुकरणेनसिद्धेग्रंथस्यवाक्यार्थमिदंसूत्रमितिस्थितं ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सि॰कौ॰टी॰
३

आद्योच्चारणमिति यद्यपि उपदिश्यते ऽनेनेति करणव्युत्पत्त्या शास्त्रमुपदेश इति भाष्यवृत्त्यादिषु व्याख्यातं तथापि तत्प्रौढिवादमात्रम् करणेघञो दुर्लभत्वात् स्मृत्वा बाधात् नचच असंज्ञात्वात् प्रायेण संज्ञायामिति व्याख्यानस्य क्लिष्टत्वात् नह्युपाधेरुपाधिर्न्न वर्त्ततेत्यादिना भाष्यकृता अवहेलनाच्च अतएव घोषवा दोहलश्चेति घञपीहन वाहुलकं त्वगतिकगतिः अतएव प्रक्रियां ते शाद्यायानिमित्तिकरणव्युत्पत्तिरपि परास्तातथाच वार्त्तिकम् अजब्रन्तो खलना स्त्रियाः खलनो विप्रतिषेधेनेति अतो भावेप्रत्यय एवमाय इति भावः यत्तु धातुसूत्रे सादिपठंति यच्च व्याचष्टे करणव्युत्पत्त्या पूर्वाधीपात्रानां उपदेशत्वकर्म्मव्युत्प त्तानुशासनादीनांउणादिलिङ्गानुशासनयोरपि शास्त्रत्वात् सिद्धं पृथगुपादानं गोवलीवर्द्दन्यायेन एवं गणत्वादेवसिद्धे धातोरपी सादि अत्रेदं वक्तव्यम् किमेषामुपदेशसंज्ञा उतयोगमात्रं नाद्यः संज्ञायाः शास्त्रकारैरनुक्तेः असंज्ञात्वाद्धञ्प्रत्ययेनेति भाष्यकारोक्तेश्च असदादि कृतसंज्ञाया शास्त्रमव्यवस्थापक त्वे ऽतिप्रसंगाच्च आमोमित्वमदत्वादित्यादिस्वपर्य्ययविरोधाच्च नह्युत्तसृष्टानुबन्धस्य आमोनप्रत्ययत्वयेनमित्वं न भवेत् किंचैवंप्रत्याणविधौपंचम्याः प्रक ल्पकत्वे सनः सनेक आदेशो स्त्वित्याशंक्य उपदेशग्रहणाभावादित्संज्ञानस्यादिति भाष्यकैः परोक्तं व्याकुप्येत किंचनधातुलोपइति सूत्रे धातुग्रहणं किं न्नूल वितापूक्षूपवितेति भाष्य उपदेश एवानुबन्धलोपक्तृतेतोधातुसंज्ञेत्येवं परः कैमट्यग्रंथश्च विरुध्येत अपिच घुमास्थेत्यावितिसूत्रे लोपश्चेति द्विशकारको निर्द्देशः द्वितीयः शकार इदिति अलोत्यात्सूत्रस्थ भाष्यकैय्यटादिकमपि विरुद्ध्येत नद्वितीयः योगस्यैव पुरस्कारे परिगणनस्य व्यर्थत्वात् धात्वादिषु करणव्युत्प त्तिः आगमादिषु नेति वैषम्यस्य दुरुपपादत्वाच्च उपदेशताप्रयोजकधातुत्वादिरूपोपाधवच्छिन्नसमुदायात्यहलिदित्स्यर्थ इति स्वग्रंथविरोधाच्च पक्षद्वये ऽपि लिङ्गानुशासनस्य प्रकृतानुपयोगात्तल्लोपश्चेति शकारस्यासंग्रहाच्च आदेच उपदेशे उपदेशेत्वत इत्यादौ आद्योच्चारणस्यैव उपदेशपदार्थतया सर्वस म्मतत्वाच्चेति दिक्॥ ॥

हलन्त्यं उपदेशेन्त्यं हलित्स्यात् उपदेश आद्योच्चारणं ततोणजित्यादिसंज्ञाप्रसिद्धौ॥

उपदेशेन्त्यं हलिति उपदेशे किं अग्निचित् सोमसुत् इति काशिका अत्रेत्संज्ञायां लोपः स्यात् नचतुकौ वैयर्थ्यं आगत्येत्यादौ चरितार्थत्वात् नच क्विपः पित्त्वस्य वैयर्थ्यं अग्निचितावित्यादौ चरितार्थत्वादिति हरदत्तः अत्र किं मतिनाम कारस्य मान्तत्संसाहात्संज्ञायां तत्साद्यचः परः स्यात् वेश्मसमसर्वधातुसोमानित्वं हलि तिकिं नूत्संज्ञायां नविता नचप्रयोजनाभावान्नेत्वमिति वाच्यं सत्यामित्संज्ञायां उदितइति इड्विकल्पापत्तेः अन्येतु चिरिणोति जिरिणोति इह धातोरंत्यस्य मान्तत्संसा

नित्संज्ञायामिदितइति नुम्स्यादित्याहुः आद्योच्चारणमिति आद्योच्चारणविष यीभूतोयः शास्त्रसंदर्भ स्तस्मिन्नंत्यं हलित्स्यादिति फलितोर्थः॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

उपदेशेऽजनुनासिक इत्। यद्यप्यत्रोपजीव्यत्वादनुनासिकसंज्ञां प्रथमं वक्तुमुचिता तथापि नासिकामनुगत इति योगाश्रयणेनैव गतार्थत्वादनुनासिक
संज्ञासूत्रं मंदप्रयोजनमिति ध्वनयितुं नेहोपन्यस्तं उपदेशे किं अनृ अं अपः यद्यपीह उ ऊँ इत्यत्रेव विधानसामर्थ्यान्नेत्वमिति सुवचं तथापि उत्तरार्थमवश्यं
कर्त्तव्यमुपदेशग्रहणं स्पष्टप्रतिपत्तये इहैव कृतं अभ्रि मतिनो मकारस्य मा भूत्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

उपदेशेऽजनुनासिक इत् उपदेशेऽनुनासिको जित्संज्ञः स्यात्॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

उपदेशेऽजनु उपदेशेनमुपदेशो नावेद्यत्र उपदेशे किं अभ्र अं अपः सप्तम्यर्थद्योतकोयमाङ् आङोऽनुनासिकश्छंदसीत्याकारोऽनुनासिकः यद्यप्यत्र
उञ ऊँ इत्यत्रेवानुनासिकविधानसामर्थ्यान्नेत्वमिति सुवचं तथाप्युत्तरार्थमावश्यं कर्त्तव्यमुपदेशग्रहणं स्पष्टप्रतिपत्तये इहैव कृतं अभ्रि मतिनो मकारस्य
मा भूत् नच हलंत्यमिसंत्यग्रहणसामर्थ्यादेव तस्य मकारस्य न भवेदिति वाच्यं आलवत्वाप्रत्ययादावितिप्रसंगकरणेन तस्य चरितार्थत्वात् अनुनासिक इ
तिकिं ईदूदेद्द्वने ई इति: सत्ताह तसंज्ञायां श्वीदितो निष्ठायामिति एन स्यात् यद्यप्यत्रोपजीव्यत्वादनुनासिकसंज्ञा प्रथमं वक्तुमुचिता तथापि नासिकाम
नुगत इति योगाश्रयणेनैव गतार्थत्वादनुनासिकसंज्ञासूत्रं मंदप्रयोजनमिति ध्वनयितुं नेहोपन्यस्तं नचैवं यरोऽनुनासिकेऽस्मत्र यरः पदांतस्यानुनासिक
वाकॄपरे अनुनासिकश्चात्स्यादित्यर्थः प्रसज्येत स्वरूपमिति परिभाषोपस्थानात् संज्ञाकरणेतु अष्टाद् संज्ञेति निषेधान्नायं दोष इति वाच्यं उक्तपरिभाषाया
भाष्ये प्रत्याख्यानात् उपान्मंत्रकरणे पृच्छमाङ्चावाणिङ् ऊमुस्मित्स्यमित्यादिनिर्देशेन स्वरूपमिति परिभाषाया अनुपस्थितिकल्पनात् तत्रमतेपि दोषाभा
वात् ननूक्तनिर्देशाश्रयणे प्रतिपत्तिगौरवमिति चेत् अतएव निष्प्रयोजनमित्यनुक्त्वा दमं प्रयोजनमित्युक्तं॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

त्ति ५ इति ३

सि·कौ·टी·
४

प्रतिज्ञायत इति प्रतिज्ञाः आतश्चोपसर्ग इति कर्मण्यङ् प्रतिज्ञा आनुनासिक्यमेषामिति विग्रहः एवं च प्रतिज्ञासमधिगम्ये प्रतिज्ञाशब्दस्य लक्षणेति क्लिष्टव्याख्या
नेन आश्रयणीयं पाणिन्युपज्ञं व्याकरणमित्यादि दृष्टिवलक्षणां विनैव निर्वाहात् यद्यपि सूत्रकारकृतोऽनुनासिकपाठ इदानीं परिभ्रष्टस्तथापि वृत्तिकारादिव्य
न्यंरू वहारबलेन यथाकार्यं प्राक् स्थित इत्यनुमीयत इति भावः ननु रलयोरिति नूनं टकारस्यापि मध्यगत्वादित्यत आह· प्रत्याहारेष्विति व्यवह्रियन्ते प्रत्याह्रियं
ते संक्षिप्यन्ते वर्णा यत्रेति बाहुलकादधिकरणे घञ् यद्यपि योगमात्रमकारादिसंज्ञास्वतिप्रसक्तं तथापि योगरूढिरिति भावः प्रत्याहाराश्चैकचत्वारिंशदिति
प्राचः चतुर्दशसूत्रीस्थैर्हल्मिरिड्विः कृता अष्टाध्याय्यां व्यवहृता एकचत्वारिंशदित्यस्यार्थः तेन सुप्तिङादीनां प्रत्याहारस्य च यो द्वितीया इति वार्तिकस्थस्य च प्र
त्याहारस्य चाधिक्येऽप्यदोषः यत्तु जमन्ताड्ड इति यमि जमेतश्च निङक इष्यत इति चञ्मे वार्तिककृता व्यवहृत इत्याहुस्तद्भ्रमसंनिधानम् आद्यस्य णादेस्स
त्वात् द्वितीयस्य वाग्भूतिकारिकास्थत्वादित्यास्तां तावत् एषा च संख्यानियमो नातीवोपयुज्यत इत्युपेक्षितः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रतिज्ञानुनासिक्याः पाणिनीयाः लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा प्रत्याहारेष्वितां न ग्रहणं अ
नुनासिक इत्यादिनिर्देशात् न ह्यत्र ककारपरस्य कार्यं दृश्यते आदिरन्त्येनेत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते॥

प्रतिज्ञायत इति प्रतिज्ञा आतश्चोपसर्ग इति कर्मण्यङ् अनुनासिकस्य भाव आनुनासिक्यं गुणवचनब्राह्मणादिभ्य इति ष्यञ् प्रतिज्ञा आनुनासिक्यं येषा
मिति विग्रहः केचित्तु प्रतिज्ञानं प्रतिज्ञा सास्त्यस्यास्तीति प्रतिज्ञः अर्श आद्यच् प्रतिज्ञमानुनासिक्यमेषामिति विग्रह इति यद्यपि सूत्रकारकृतोऽनुनासिकपाठ
इदानीं परिभ्रष्टस्तथापि वृत्तिकारादिव्यवहारबलेन यथाकार्यं प्राक् स्थित इत्यनुमीयत इति भावः पाणिनीया इति पाणिनिना प्रोक्तं पाणिनीयं वृद्धाच्छः त
दधीयते विदन्ति वा पाणिनीयाः तदधीते इत्यण् प्रोक्ताल्लुगिति लुक् ननु रलयोरिति नूनं टकारस्यापि मध्यगत्वादत आह प्रत्याहारेष्विति अनुनासिकत्वा
दीनि आदिशब्देन पापाणके कुत्सिते रङ् इत्यादिग्राह्यः प्रत्याहारशब्देनेति प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा यत्रेति प्रत्याहारः करणाधिकरणयोश्चेति ल्युट् प्राप्ते
कृत्यल्युटो बहुलमिति बहुलग्रहणादधिकरणे घञ् यद्यपि योगमात्रमकारादिसंज्ञास्वतिप्रसक्तं तथापि योगरूढिरिति भावः॥ ॥ ॥ ॥ ॥ ॥

त१

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ऊकालोऽच् ह्रस्वदीर्घप्लुतइति समाहारद्वंद्वः सौत्रंपुंस्त्वं वांकालइवेतिफलितार्थकथनमिदं विग्रहस्तुवःकालोऽस्येतिबोध्यः ऊशब्देनस्वोच्चारणकालोलक्ष्यते
आपइति निपाताआद्युदात्ताद्व्याकारउदात्तः यच्छन्दस्तुफिट्स्वरेण अर्वाङितिअकारोऽनुदात्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ऊकालोऽज्झ्रस्वदीर्घप्लुतः उश्च ऊश्च ऊँश्च वः वांकालइवकालोयस्यसोऽच्क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञःस्यात् सप्रत्येकमुदात्ता
दिभेदेन त्रिधा उच्चैरुदात्तः ताल्वादिषु सभागेषुस्थानेषुऊर्ध्वभागेनिष्पन्नोऽजुदात्तःस्यात् आयेनीचैरनुदात्तः स्पष्टं
अर्वाङ् समाहारःस्वरितः उदात्तानुदात्तत्ववर्णधर्मौसमाह्रियेतेयस्मिन्सोऽच्स्वरितसंज्ञःस्यात् ॥ ॥ ॥ ॥ ॥
ऊकालोचह्रस्वदीर्घप्लुतइतिसमाहारद्वंद्वे सौत्रंपुंस्त्वं ऊइतित्रयाणांप्रश्लेषेणनिर्देशइत्याह उश्चऊश्चऊ३श्चेतिवाः वामितित्रयाणांसवर्णदीर्घेकृतेजसियर
तोयणिवः आमितुवांकालइवकालोयस्येतिफलितार्थःकथनमिदं विग्रहस्तुवःकालोयस्येतिबोध्यः ऊशब्देनस्वोच्चारणकालोलक्ष्यते अचुकिं संयोगस्य
मात्भूत् प्रतक्ष्य प्रतक्ष्य कषयोरेकमात्रत्वेन ह्रस्वसंज्ञायां ह्रस्वस्यपितिकृतीतितुक्स्यात् आयइतिनिपाताआद्युदात्ताद्व्याकारउदात्तोयच्छन्दस्तु फिषइत्यन्तोदा
त्तः परस्यजसः सुपाद्नुदात्तत्वे त्यदाद्यत्वेपररूपत्वेशीभावेआद्गुणेचसत्येकादेशउदात्तेनेत्येकारउदात्तः अर्वाङिति अर्वतमंचतीत्यर्वाङ् ऋत्विगादिना
अंचतेसुप्युपदेक्विन् ऋगतावितिस्मात् स्नामद्यिपद्यर्तीत्यादिनावनिपिगुणेचनिष्पन्नोर्वन्नाद्युदात्तोधातुस्वरेणाद्युदात्तःवनिपःपित्वेनानुदात्तत्वात् अंच
तेरकारोपिधातुस्वरेणनित्स्वरेणवाउदात्तः उपपदमतिङितिसमासेकृतसमासस्येतिस्वरेणतदपवादभूतेनगतिकारकोपपदात्कृदितिकृदुत्तरपद
प्रकृतिस्वरेणवाअंचतेरकारउदात्तः वनोनलोपसवर्णदीर्घचकृतेएकादेशउदात्तेनेत्याकारउदात्तइत्यनुदात्तंपदमेकवर्जमितिशेषनिघातादाद्योऽ
कारोत्रानुदात्तःएतच्चसमन्वानिप्रायेणोक्तं वेदभाष्येतुअर्वाङ् अग्निमुखइतिस्थितं॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तस्मादितः अतंत्रमिति उपेयिवानित्यत्र उपसर्गेऽस्य अविवक्षितमित्यर्थः ननु लत्वेऽपि वा समतिस्त्रि धइत्यादि प्रयोगदर्शनाद विवक्षास्तु इहतु अविवक्षा
यांप्रमाणंकिमिति चेत्फलस्यदर्शनं प्रातिशाख्यादिकं चेतिगृहाण: तथाहि· येराइत्यत्र एकार: तनूनपात्छचीपतिमित्यत्र पदपाठे ऊदीतौ चाद्यौदात्तौ इतिस
फलवद्धत्वप्रसिद्धं तनूनपात्छचीपतिशब्दयो: उभेवनस्पत्यादिषुयुगपदितिपूर्वोत्तरपदयोराद्युदात्त[illegible]त्वेकृते अनुदात्तंपदमेकवर्जमितिशेषानिघातः पूर्वप
दभूतयोस्तनूशचीएतयोरंत्यस्याद्विकं स्वरितत्वंप्रातिशाख्येउक्तं जात्यवद्भूतथावांन्नौतनूशचीतिपूर्वयोरिति· तथास्वरिता र्धस्य उदात्तत्वेप्रातिशाख्यम
पि एकान्तरसमावेशे पूर्वयोः स्वरितःस्वरः तस्योदात्ततरोदात्तादर्धमात्रार्धमेववा अनुदात्तः परः शेषः सउदात्तश्रुतिर्नचेत् उदात्तंवोच्यतेकिंचित्स्वरितंवा
क्षरंपरमिति अस्यार्थः पूर्वयोरुदात्तोऽनुदात्तत्वयोरेकत्रसमावेशे सतिस्वरितोवोधः तस्यस्वरितस्यस्वतंत्रोदात्तापेक्षयाउदात्ततरार्धमात्रावोध्येति कुवो
श्वाऽइत्यादिहस्वाअनिप्रायं अर्धवेतिदीर्घाभिप्रायं अनेनैवह्रस्वस्यापिसंग्रहात्व्यापकत्वादिदमेवार्त्तव्यमितिसूचयितुमेवकार: अनुदात्तइत्यादिप्रातिशे
प्रसिद्धार्थकथनं सशेष: उदात्तश्रुतिःस्यात् किमविशेषेणनेत्याह नचेदित्यादि उदात्तस्वरितपरं विहायेत्यर्थः साकल्योप्याह अप्राक्तस्तुयःस्वारःस्वरि
तोदात्तपूर्वगः उदादायार्धमस्याऽथशिष्टंनिघ्नंति कंपितमिति उदादायउदात्तंकृत्वा अर्धह्रस्वशब्देन अर्धमात्रालक्ष्यतइतिहरदत्तादिग्रंथास्तुमतांतरे
तयाकथंचिन्नेया॥ ॥

तस्मादितउदत्तमर्द्धह्रस्वम् ह्रस्वग्रहणमतंत्रं स्वरितस्यादितोर्धमुदात्तंवोध्यं उत्तरार्धंतुपरिशे
षादनुदात्तं तस्यचोदात्तस्वरितपरत्वे श्रवणंस्पष्टं अन्यत्रतूदात्तश्रुतिः प्रातिशाख्येप्रसिद्धा॥ ॥

अतंत्रमिति अविवक्षितमित्यर्थः तस्यचोदात्तस्वरितपरत्वइति उदात्तस्वरितौपरौयस्मात्तदुदात्तस्वरितपरं तस्यभावस्तत्वंतस्मिन् उदात्तोवास्वरितोवाप
रश्चेत्पूर्वस्यस्वरितस्ययदुत्तरार्द्धमनुदात्तं तस्यश्रवणंस्पष्टमित्यर्थ अन्यत्रेतिउदात्तस्वरितपरत्वाभावे॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

क्वेति : किमोऽत् । तित्स्वरितंवइति अनुदात्तंसर्वमपादादावित्यधिकारात् अनुदात्तं अस्य इति अशेः क्वनिनित्स्वरेणाद्युदात्तं संहितायांतु एकादेश उदात्तेनो दात्तः इत्योकार उदात्तः ये अराइति द्वयमपिफिट्स्वरेणांतोदात्तं एकादेशस्तुपरत्वे स्वरितः स्वरितोवाऽनुदात्तेपदादाविसूत्रे मुखंचनासिकाचेतिविग्रहेप्रा ण्यंगत्वादेकवद्भावेमुखनासिकमितिस्यादतआह· मुखसहितेति

क्वोस्याः रथानांनयेराः शतचक्रंयोह्यः इत्यादिष्वनुदात्तः अग्निमीळेइत्यादौउदात्तः श्रुतिः सन्नवविधोपिप्रत्येकम नुनासिकाननुनासिकत्वाभ्यांद्विधा मुखनासिकावचनोनुनासिकः मुखसहितनासिकयोच्चार्यमाणोनुनासिक संज्ञः स्यात् तदित्थं अइउऋएषांवर्णानांप्रत्येकमष्टादशभेदाः ऌवर्णस्यद्वादशः तस्यदी र्घाभावात् एचामपिद्वादशतेषांह्रस्वाभावात् ॥

क्वेति किमोत् तित्स्वरितंवइति अनुदात्तंसर्वमपादादावित्यधिकारादनुदात्तः अस्याइति अशेः क्वनितिनित्स्वरेणाद्युदात्तंसंहितायांत्वेकादेशउदात्तेनोदा त्तइत्योकारउदात्तः उदात्तपरत्वेह्रस्वस्वरितस्योदाहरणमुक्त्वा दीर्घस्वरितस्योदाहरणमाह रथानानयइति येअराइति द्वयमपिफिट्स्वरेणांतोदात्तं एकादे शस्तुपरत्वेस्वरितः स्वरितोवानुदात्तेपदादावितिसूत्रेण स्वरितपरत्वेउदाहरणमाह शतचक्रमितियइतिफिट्स्वरेणांतोदात्तः ततःपरस्यस्कारस्यरुत्वेउत्वेगुणे णेचउदात्तेनैकादेशादोकारउदात्तः अर्हइतिस्वरितांतत्वादकारस्यप्रोषनियात्वेओकारेणसहएकादेशे चक्रेतस्वरितोवानुदात्तेपदादावितिओकारः स्वरितः कथमहस्यस्वरितांतत्वमितिचेत् अत्राहुः अर्हव्याप्ताविस्मात्कर्मणिण्यत् तित्स्वरितंवा इत्यनावस्तुसंज्ञापूर्वकविधेरनित्यत्वादिति अग्निमीळइति ईकारः स्वरितः ळेइतितत्रत्ययायरपर्यायेएकश्रुतिरितिचस्वरप्रक्रियायांमूलएवस्फुटीभविष्यति मुखनासिका मुखंचनासिकाचेतिविग्रहेप्राण्यंगत्वादेकवद्भावे मुखनासिकमितिस्यादतआह मुखसहितेतिनासिकयोच्चार्यतेतिफलितार्थकथनमिदंउच्यते अनेनेतिवचनं मुखनासिकावचनमस्येतिविग्रहः ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तुल्यास्यः आस्येनवं आस्यं शरीरावयवासात् इत्यभिप्रेत्याह तात्वादीति आस्यंतरेति एतच्च प्रशाद्धवलाल्लभ्यते तुल्यास्यं किं तर्हि अत्र पकारस्य तकारे पर ऊरूष्मा इति तिलो
पोमाभूत प्रयत्नग्रहणं किं वाक्श्चोतति शस्य लोपेन जमङणनानामिति नासिका चेति चकारेण स्वस्ववर्गानुकूलं ताल्वादि समुच्चीयते अनुस्वारोत्तमा अनु
नासिका इति तैत्तिरीयाणां प्रातिशाख्ये यमानुस्वारनासिक्यानां नासिके अनुनासिका श्चोत्तमा इति कात्यायनप्रातिशाख्ये वर्गोत्तमाङ ञणनमा अनुनासिका
भवंति वशात्वा स्वस्थानाद्यपरित्यागद्वारेण नासिका स्थानं द्वितीयमेषामित्यर्थः इति तत्प्राप्यं च एदैतोरित्यादौ तत्परत्वमसंदेहार्थं न तत्कालग्रहणार्थं तेन प्लुतस्यापि संग्रहः

तुल्यास्यप्रयत्नं सवर्णं ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णं स्यात् अकुहविसर्जनीया
नां कंठः इचुयशानां तालु ऋटुरषाणां मूर्द्धा लृतुलसानां दंता उपूपध्मानीयानामोष्ठौ ञमङणनानां नासिका च एदैतोः कंठ
तालु ओदौतोः कंठोष्ठं वकारस्य दंतोष्ठं जिह्वामूलीयस्य जिह्वामूलं नासिकानुस्वारस्य इति स्थानानि यत्नो द्विधा आभ्यंतरो
संवृतोऽ बाह्यश्च आद्यश्चतुर्द्धा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् तत्र स्पृष्टं प्रयत्नं स्पर्शानां ईषत्स्पृष्टमंतस्थानां विवृतमूष्मणां स्वराणां च ह्र
स्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियादशायां तु विवृतमेव एतच्च सूत्रकारेण ज्ञापितं तथाहि अ अ इति विवृतमनूद्य संवृतोऽने
न विधीयते अस्य चाष्टाध्यायीं संपूर्णां प्रत्यसिद्धत्वा च्छास्त्रदृष्ट्या विवृतत्वमस्त्येव तथा च सूत्रं ॥ ॥ ॥ ॥ ॥ ॥

तुल्यास्यः आस्येनवमास्यं शरीरावयवाद्यदित्यभिप्रेत्याह ताल्वादीति आस्यंतरेति एतच्च प्रशब्दबलाल्लभ्यते तुल्यस्य किं तर्हि अत्र पकारस्य तकारे पर ऊरूष्मा इति तिलो
पोमाभूत प्रयत्नग्रहणं किं वाक्श्चोतति शस्य लोपेन जमङणनानामिति नासिका चेति च कारेण स्ववर्गानुकूलं ताल्वादि समुच्चीयते एदैतोरित्यादौ तत्परत्व
मसंदेहार्थं न तत्कालग्रहणार्थं तेन प्लुतस्यापि संग्रहः चतुर्द्धेति निष्कर्षः पूर्वं तु पंचधा ऊष्मणामीषद्विवृतप्रयत्नाभ्युपगमात् स्पृष्टेषत्स्पृष्टेति एतेषामाभ्यंतरत्वं
वर्णोत्पत्तेः प्रागभावित्वात् तथाहि नाभिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रमन्नुरः प्रभृतीनि स्थानान्यास्कंदति ततो वर्णस्य तदभिव्यंजकध्वनेर्वा उत्पत्ति
स्तत्रोत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिः स्थानं ताल्वादि सम्यक् स्पृशंति तदा स्पृष्टता ईषद्यदा स्पृशंति तदा ईषत्स्पृष्टता सामीप्यावस्थानमा
त्रे संवृतता दूरत्वे विवृता अत एव इचुयशानां तालव्यत्वाविशेषेऽपि तालुस्थाने न सह जिह्वाग्रादीनां च वर्णो च्चारणे कृत्स्नस्पर्शः यकारे ईषत्स्पर्शः शकारे
कारयोस्तु दूरस्थितिरित्याद्यनुभवं विहाय कारा न्निश्चानुपपत्तेर्विवेचनीयं विवारसंवारादयस्तु वर्णोत्पत्तेः पश्चान्मूर्द्धि प्रतिहतनिवृत्ते प्राणाख्ये वायावुत्पद्यंत इति वा

स्यादेतु चेत्ते गले विलसस्यं कौ चातं संवार. तस्यैव क्रिया साद्विवारः एतौ च संवृ
तविवृतरूपावाभ्यंतरावाभ्यां भिन्नावेव तयोः समीपदूरावस्थानात्मकत्वादिस
वधेयं अत्र सुपामिति विन कोलुक आद्यो विवृतः द्वितीयः संवृतस्तदाह वि वृतम
नूद्येति विवृतस्य स्थान इत्यर्थः विवृतत्वमस्त्येवेति तेन दंडानयनमित्यादौ सवर्ण
दीर्घः सिध्यतीति भावः ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पूर्वत्राऽसिद्धं यद्ययं स्वतंत्रो विधिः स्यात्तर्हि त्रिपादी पूर्वं प्रत्यसिद्धा इत्येव लभ्येत त्रैपादिकं तु पूर्वं प्रति परं नासिद्धं स्यादत आह अधिकारोऽयमिति यद्यत्र कार्या
सिद्धत्वमिष्येत तर्हि पूर्वत्रासिद्धमिति मुनेरारम्भः सपादोऽत्र न स्यात परत्वाद् इत्यस्य प्रसंगात ततथा च पूर्वत्वासिद्धो नास्ति विप्रतिषेधोऽभावादुक्तं स्येति सिद्धांतो
व्याकुप्येत अमू अमी इत्यादि च न सिद्ध्येदत आह त्रिपादीति परं शास्त्रमिति च एतेन त्रिपाद्यां विहितं कार्यमसिद्धमित्यादि प्राचां ग्रंथः परास्तः विवृत एवते कं
मिति विवार एवास्य प्रयत्न इति भावः वर्गयमगा इति वर्गगायमगाश्चेत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पूर्वत्रासिद्धं अधिकारोऽयं तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं बाह्यप्रयत्नस्त्वे
कादशधा विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राणो उदात्तोऽनुदात्तः स्वरितश्चेति खयां यमाः खयः ≍क ≍पौ
विसर्गः शर एव च एते श्वासानुप्रदाना अघोषाश्च विवृण्वते कंठमन्ये तु घोषाः स्युः संवृता नादभागिनः अयुग्मा वर्गयमगा यणश्चा
ल्पासवः स्मृताः ॥

पूर्वत्रासिद्धं यद्ययं स्वतंत्रो विधिः स्यात्तर्हि त्रिपादी पूर्वं प्रत्यसिद्धेत्येव लभ्येत त्रैपादिकं तु पूर्वं प्रति परं नासिद्धं स्यात् तथा च प्रशानित्यत्र मो नो धातोरिति
नत्वस्यासिद्धत्वान्नलोपः स्यात नत्वविधेः संवुद्धौ चरितार्थत्वात् तथा नड्वानित्यत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपः स्यात नुम्विधेस्तु संबुद्धौ चरितार्थत्वात्
अत आह अधिकारोऽयमिति त्रिपाद्यां विहितं कार्यमिति कार्यासिद्धिपक्षे अमू अमुमित्यादि न सिद्ध्येदिति भावः यथा चैतन्न सिध्यति तथाऽदसः प्रावृत्याख्यावस
रे स्मानिरूपयिष्यते एकादशधेति यद्यपि नाभ्येऽत्रावुक्ता उदात्तादयस्तु नोक्तास्तथापि केयटोक्तिमनुसृत्यैकादशोक्ता इति बोध्यं खयां यमा इति बाल
बोधनाय बाह्यप्रयत्ना केश्चित्संग्रहीतास्तेनापि निवद्धाः तद्यथा खरो विवाराः श्वासा अघोषाश्च हशः संवारा नादा घोषाश्च वर्गाणां प्रथमतृतीयपंचमा यणश्चा
ल्पप्राणाः वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणा इति श्वासानुप्रदाना इति श्वासप्रयत्नका इत्यर्थः विवृण्वते कंठमिति विवार एवास्य प्रयत्न इति भावः अ
न्ये त्विति हशो हशां यमा अनुस्वारश्च नादे तिनादभागिनो नादप्रयत्नवंतः अयुग्मा इति प्रथमतृतीयपंचमा वर्गेष्वयुग्माः वर्गयमगा इति वर्गगायमगाश्च

त्यर्थः अल्पेति अल्पासवोऽल्पप्राणाः पुंसि नस्यसवः प्राणा इत्यमरः ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सि॰कौ॰सरी ७

कादय इति लोकप्रसिद्धपाठापेक्षमिदं चतुर्दशसूत्रीमात्रावसानत्वायोगात् अर्द्धविसर्गेति सादृश्यमुच्चारणेऽल्लेखनेन च बोध्यं ऋऌवर्णयोरिति ऋ च ऋ च ऋरौ ऌ च ऌ च ऌलौ तौ च तौ वर्णौ चेति विग्रहः उश्चउलक्च ऌलौ तयोर्वर्णयोरितिवा प्रथमान्तेन परिनिष्ठितविग्रहत्यावा विग्रह इति सिद्धान्तात् ऋत्यक इति प्रकृतिभावः॥ ॥

वर्गेष्वाद्यानां चतुर्णां पंचमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः पलिक्क्नीः चख्ख्नतुः अग्ग्निः घघ्घ्नन्ति इत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः तत्र वर्गाणां प्रथमद्वितीयाः खयः तथा तेषामेव यमाः जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येषां विवारः श्वासो घोषश्च अन्येषां तु संवारो नादो घोषश्च वर्गाणां प्रथमतृतीयपंचमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः अन्ये महाप्राणा इत्यर्थः वाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायां अनुपयुक्तास्तथापि आंतरतम्यपरीक्षायामुपयोक्ष्यंत इति बोध्यं कादयो मावसानाः स्पर्शाः यरलवा अन्तस्थाः शषसहा ऊष्माणः अचः स्वराः ᳵक ᳵप इति कपाभ्यां प्रागर्द्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ अं अः इत्यचः परावनुस्वारविसर्गौ इति प्रयत्नविवेकः ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यं

अनुपयुक्ता इति अन्यथा करवगघादीनां परस्परं सावर्ण्यं न स्यादिति भावः आंतरतम्यपरीक्षायामिति परीक्षा च अघोषस्य महाप्राणस्य तस्य तादृश एव थकारः घोषवतो नादवतो महाप्राणस्य हस्य तादृशो वर्गचतुर्थ इत्यादि स्फुटीभविष्यति कादय इति लोकप्रसिद्धपाठापेक्षमिदं चतुर्दशसूत्रीमात्रावसानत्वायोगात् कपाभ्यां प्रागिति एतच्चोपलक्षणं खफाभ्यां प्रागित्यपि बोध्यं अर्द्धविसर्गेति सादृश्यमुच्चारणेऽल्लेखनेन च बोध्यं ऋऌवर्णयोरिति ऋत्यक इति प्रकृतिभावः

अकारहकारयोरिकारशकारयोरीकारषकारयोर्ऌकारसकारयोश्च सावर्ण्यप्राप्ते॥ ॥

विग्रहस्तु ऋ च ऌ च ऋऌ वर्णाश्च ऋऌवर्णौ तयोरिति तेन ऌके मनोरमायां तु ऋ च ऋ च ऌ च ऌ च ऋऌलौ तौ च तौ वर्णौ चेति साधितं॥ ॥

नाज्झलौ आकारसहितइति अत्रचकालसमयवेलासुइत्यादिनिर्देशः प्रश्नेतेषलिंगं नचैवमपिपिपासोइत्यादौगुरोरनृतइतिप्लुतादाकारात्सरसन:
सस्यषत्वंस्यादेवेतिवाच्यं आश्वआश्चेतिहहेसवर्णदीर्घेणदीर्घात्परत्वप्लुतोपिप्रश्लिष्यतइतिव्याख्यानात् पणादिकमिति शीतलश्चाद्रसवर्णदीर्घश्च दिशब्दार्थः अत्रेति अत्रैवसर्वः

नाज्झलौ आकारसहितो अच् आचसचहलचेत्येतौनमिथः सवर्णौस्तः तेनदधीत्यस्यहरति
शीतलंषष्ठंसांद्रमित्येतेषुपरेषुपणादिकंन अन्यथादीर्घादीनामिवहकारादीनामपिग्रहणकशास्त्रबलादच्त्वंस्यात् त
याहि अणुदित्सवर्णस्यचाप्रत्ययः प्रतीयतेविधीयतेइतिप्रत्ययः अविधीयमानोअणउदिच्चसवर्णस्यसंज्ञासात् अत्रैवाण
परेणणकारेण कुचुटुतुपुएतेउदितः तदेवमइत्यष्टादशानांसंज्ञा तथैकारोकारौ ऋकारस्त्रिंशतः एवंलृकारोपि एचोद्वादशा
नां एदैतोरोदौतोश्चनमिथःसावर्ण्यं ऐऔजितिसूत्रारम्भसामर्थ्यात् तेनैषांचतुर्विंशतिःसंज्ञाःस्युरितिनापादनीयं ॥ ॥

नाज्झलौ आकारसहितइति कालसमयवेलास्वित्यादिनिर्देशात् आकारप्रश्लेषेलिंगं पणादिकमिति शीतलशाद्रसवर्णदीर्घआदिशब्दार्थः इहअसेधदित्या
दौहोढइतिढत्वेनतस्यापिसत्वंच इणइतिसस्यषत्वमपिनेतितन्नसुवचं ढत्वप्रतीतस्यासिद्धत्वादितिदिक् अन्यथेति नाज्झलावित्यस्याभावे ग्रहणकशास्त्रब
लादितिअयंभावः दीर्घादीनामिवहकारादीनामप्यकारादिवाच्यत्वमुपगतेह्यच्त्वंस्यात् प्रत्याहारेषुतद्वाच्यवाच्येनिरूढलक्षणामुपगमादितिअवि
धीयमानोणितितेनइदमइण् इत्तइत्यत्रत्रिमात्रइकारोनभवति उदिच्चेति इहविधीयमानइतिनसंबध्यते उदित्करणसामर्थ्यात्तेनविधीयमानोप्यु
दित्सवर्णान्गृह्णात्येव कुहोश्चुःजातादन्यष्टुनापरेणणकारेणेति व्याख्यानतोविशेषप्रतिपत्तेः ऋतउदित्यादौतपरकरणलिंगाच्च यदिपूर्वेणस्यात्तर्हि
तपरत्वमिहानर्थकंस्यात् ऋकारस्याणत्वेनसवर्णग्राहकत्वात् एवंचतपरत्वाद्दीर्घनउपऋकारीयतीत्यादिवस्यमाणग्रंथःसंगच्छते एवंलृकारो
पीति त्रिंशतःसंज्ञेत्यनुषज्यते एतच्चन्यायसाम्यादुक्तं वस्तुतः लृकारस्यऋकारग्राहकत्वेनकुत्राप्युपलभ्यते सच्चारंनसामर्थ्यादितिसतिनसावर्ण्येएको
रोणैकारग्रहणादोकारेणचौकारग्रहणादैऔजितिसूत्रारम्भोवृथास्यादितिभावः नापादनीयमिति तेनग्लौकलावइत्यत्रऔतोम्शसोरितिनप्रव

॥ नीयमित्यत्रलक्षणस्यप्रवृत्तिविषयाति ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

७रि१

सि॰ कौ॰ टी॰ यद्यपीतिग्रहणकशास्त्रसंग्रयाप्प्यौ निष्पन्नेरिति भावः होढ स्युपलक्षणं रमास्विति तत्र षत्वं वागाशीरित्यत्र ऊयोरुत्तिग्रकारस्य घकारः दासीष्टेत्यादौ ढ
८ दीतिघत्वं चनेति वोध्यं यदि तु विवृतमूष्मणामित्यत्र ईषदित्यनुवर्त्य स्वराणां चेत्यत्र निवर्त्य प्रयत्नभेदो व्याख्यायते तदा नाज्झलाविति सत्रं मास्त्विति भा
षोध्यितं ॥ ॥

नाज्झलाविति निषेधो यद्यप्यक्षरसमाम्नायिकानामेव तथापि हकारस्याकारेण सवर्ण्यं तत्राकारस्यापि प्रश्लिष्टत्वात् ते
न विश्वपाभिरित्यत्र होढ इति ढत्वं न अननुनासिकाननुनासिकाभेदेन यवला द्विधा तेनाननुनासिकास्ते प्रश्लेषोऽस न सेद्वयोर्घयोः संज्ञाः २
नास्येव ग्रहस्मात्सवर्णात्परस्योच्चार्यमाणसमकालस्यैव संज्ञा स्यात् तेन अत इत इत्यादयः षण्णामष्टमसंज्ञाः अत इति ह्र
दशानां

यद्यपीतिग्रहणकशास्त्रसाध्याप्यनिष्पन्नेरिति भावः एतच्चाकः सवर्णे दीर्घ इत्यत्र स्फुटादयिष्यामः आन्तरेति अन्तराणां समाम्नाय उपदेशः तत्रालि तत्र भवा आन्तरसमाम्नायिकाः वक्ष्यते तेदास्त्रादिज्ञ होढ इति न भवतीति यद्यप्याकारप्रश्लेषेणाभावः संयोगान्तलोप एव प्राप्नोति न तु ढत्वं तस्यासिद्धत्वादतोऽत्र संयोगान्तलोपो न भवतीति वक्तमुचितं तथापि कार्यकाले संज्ञापरिभाषमिति पक्षे त्रैपादिके ऽन्तरंगे बहिरंगपरिभाषाया अप्रवृत्तेरन्तरंगो ढत्वे कर्तव्ये बहिरंगः संयोगान्तलोपोऽसिद्ध इति मत्वेदमुक्तमित्येके अन्ये तु संज्ञापूर्वको विधिरनित्य इति लोपस्य वारणं कथंचित्कर्तुं शक्यमिति प्राधान्येन ढत्वे नेत्युक्तमित्याहुः विश्वपाभिरित्यत्रेत्युपलक्षणं विश्वपा विश्वपामित्यादावपि न भवति होढ इत्युपलक्षणं पथ्यगार्यौ इत्यादौ ऊयोः इत्याकारसहकारेणेति दिक् यदि तु विवृतमूष्मणामित्यत्र ईषत्स्पृष्टमित्यत ईषदित्यनुवर्त्य स्वराणां चेत्यत्र निवृत्त्या ईषद्विवृतमूष्मणां विवृतं स्वराणामिति प्रयत्नभेदो व्याख्यायते तदा नाज्झलाविति सत्रं संक्षिप्ताकामित्याकारे स्थितं अननुनासिकास्ते इति येत्वान्तरसमाम्नायिका अणस्त एव सवर्णानां संज्ञा न भवतीति भावः एवं च रेफोष्मकारश्च अण्प्रत्याहारान्तर्गतोऽपि न कस्यचित्संज्ञा तत्सवर्णस्याभावादित्यवगन्तव्यं सचतात्परश्चेति तत्रादिनाऽष्टय विवक्षितमिति
भावः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

वृद्धिरादैच् ऐजिह द्विमात्र एव तात्परत्वात्तेन नहूस्मैकत्वमित्यत्र त्रिमात्रो न एवमुत्तरसूत्रेपि तेन गंगोदकमित्यादयो त्रिमात्रो न भूवादयो धातवः भूश्च
वाश्चेति द्वंद्वः आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः भूवौ आदी येषामिति बहुव्रीहिः भूप्रभृतयो वा सदृशा. सादृश्यं च क्रियावाचकत्वेनेत्यभिप्रेत्याह
क्रियावाचिन इति क्रियावाचिनः किं याः पपृपर्त्त्यादौ धातुत्वमा भूत् सति हि तस्मिन्नातो धातोरिति हि स्यात् भ्वादयः किम् हिरुक् पृथक् इत्याद्यव्ययानां शि
श्यप इति भावार्थतिङंतस्य च मा भूत् स्तंभ्वादीनामुदित्करणेन सौत्राणां धातुत्वं ज्ञाप्यते चुलुंपादीनां तु बहुलमेतन्निदर्शनमिति गणसूत्रेण संग्रहः ॥ ॥

वृद्धिरादैच् आत् ऐच् च वृद्धिसंज्ञाः स्यात् अदेङ्गुणः अत् एङ् च गुणसंज्ञः स्यात् भूवादयो धातवः क्रियावाचिनो भ्वाद
योधातुसंज्ञाः स्युः ॥ ॥

वृद्धिरादैच् आच्च ऐच्चेति इतरेतरयोगे द्वंद्वः सुपांसुलुगिति औङः सुर्लुग्वा यद्वा समाहारद्वंद्वः न चैवं द्वंद्वाच्चुदषहांता
त्समाहार इति टच् स्यादिति वाच्यं समासांतविधेरनित्यत्वात् तत्र च प्रमाणं समासेष्ववसामः अथवा आदित्य समस्तमेवास्तु वृद्धिशब्दः स्तंत्रेणावृत्या वा
योजनीयः अपस्मयादित्वेन नत्वाद्यो. कुत एजिह द्विमात्र एव तात्परत्वात् तेन नहूस्मैकत्वमित्यत्र त्रिमात्रो न वृद्धिप्रदेशा वृद्धिश्चोत्यादयः अदेङ्गुणः तपर
करणमिह सर्वार्थं तेन गंगोदकमित्यत्र त्रिमात्रो न तरतीत्यत्र तत्व कार एव न तु कदाचिदाकारः न च प्रमाणत आंतर्येण नियमसिद्धिः रपरत्वे हृते एकस्या
र्धमात्रत्वात् अपरस्या द्वितृतीयमात्रत्वात् गुणप्रदेशास्तु आद्गुण अतो गुणे इत्यादयः भूवादयः भूश्च वाश्च भूवौ वितिद्वंद्वः आदिशब्दयोर्व्यवस्थाप्र
कारवाचिनोरेकशेषः आदिश्च आदिश्च आदी भूवौ आदी येषामिति विग्रहः भूप्रभृतयो वा सदृशा सादृश्यं च क्रियावाचित्वेनेत्यभिप्रेत्याह क्रियावाचिन इ
ति क्रियावाचिन इति किं याः पश्यपसीत्यादौ धातुत्वमा भूत् सति हि तस्मिन्नातो धातोरित्यालोपः स्यादिति स्थितमनोरमायां भ्वादयः किं हिरुक पृथक् स्त
भ्वादीनामुदित्करणेन सौत्राणां धातुत्वं ज्ञाप्यते चुलुंपादीनां बहुलमेतन्निदर्शनमिति गणसूत्रेण संग्रहः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सि॰कौ॰टी
८

चादयः अद्रव्यार्थाः किम् पशुः लिंगसंख्यान्वितं ... द्रव्यं इह तु सादेव लोधं नयंति पशुमन्यमानाः पशु इति सम्यगर्थे उपसर्गाः निस् दुस् इ नि सांतौ
निस् सत्यपतावितिनिर्देशात् अयोगवाहानामविशेषेणोतिप्रकरणे निष्कृतं दुष्कृतमित्युदाहृत्य इदुदुपधस्य सकारस्य ष्यो विसर्जनीय इति नाप्य कारो
नेत्य उपसर्गस्यायतावितिसूत्रे वामनोप्येवं निरः कुषः सुदुरोरधिकरणे इति निर्देशाद्रेफांतावपीति तत्रैव सूत्रे हरदत्तः ॥ इति निपातप्रकरणं ॥ ॥ ॥ ॥

प्राग्रीश्वरान्निपाताः इत्यधिकृत्य चादयोसत्वे अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः प्रादयः
अद्रव्यार्थाः प्रादयोपि तथा उपसर्गाः क्रियायोगे गतिश्च प्रादयः क्रियायोगे उपसर्गसंज्ञाः
स्युर्गतिश्च प्र परा अप सम् अनु अव निर् निस् दुस् दुर् वि आङ् नि अधि अपि सु उत् अ
भि प्रति परि उप एते प्रादयः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्राग्रीश्वरात् तत्र विशिष्टग्रहणं किं ईश्वरे तोसुन्कसुनावित्यस्य व्याप्तिन्यायेनावधित्वं मा भूत् यदि तु प्रत्यासत्त्यैवावधिरीश्वर इत्यस्यावधित्वसिद्धिरित्युच्यते तर्हि
स्पष्टप्रतिपत्त्यर्थमेवास्तु चादयः अद्रव्यार्थाः किं पशु लिंगसंख्यान्वितं द्रव्यं इह तु सादेव लोधं नयंति पशुमन्यमानाः पशु इति सम्यगर्थे गतिश्च उपस
र्गसंज्ञया समावेशार्थश्चकारः अन्यथा आकडारादिति पर्यायः स्यात् फलं तु प्रणेयमित्यादावुपसर्गादसमास इति णत्वं गतिकारकेतिकृदुत्तरपदप्र
कृतिस्वरसिद्धिश्चेति दिक् निस् निर् दुस् दुर् इति उपसर्गस्यायतावितिनिर्दुरोर्लत्वं निलयते दुलयते निसो दुसश्च रुत्वस्यासिद्धत्वात् लत्वाभावः नि
स्यते दुरयते ॥ ॥ ॥

कु

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अत्रतत्वबोधनी य नवेतिविभाषा नेतिप्रतिषेधोवेतिविकल्पस्तदाह निषेधविकल्पयोरिति विभाषाश्वेरित्यादिषुप्रतिषेधविकल्पावुपतिष्ठेते तत्रप्रतिषेधेनसमीकृते विषयेपश्चा
द्विकल्पःप्रवर्त्तते शुशाव शिश्वायेत्यत्राप्राप्तो विकल्पः शुश्रुवतुः शिश्वियतुरित्यादौतु वचस्विपीतिनित्यप्राप्ताविति विवेकः अत्रेदंबोध्यं इतिशब्दःकाकाक्षिन्याय
नोभयत्रसंबध्यते सचपदार्थविपर्यासकृत् तेननिषेधोविकल्पश्चनवावाशब्दार्थः शंज्ञी विभाषाशब्दार्थोविकल्पः संज्ञा उभयत्रविभाषार्थंचेदंसूत्रं प्राप्तविभाषाया
न४ मप्राप्तविभाषायांचनास्योपयोगः प्राप्तविभाषायां नावांप्राप्तस्यसिद्धत्वेनविभाषाश्रुत्यापत्तेर्नवतीत्यंशस्यावश्यमनूद्यपत्ते नवतीत्यनार्थमात्रकरणात् श्री ४
विभाषायांतु अप्राप्तस्यासिद्धत्वेनयद्यपि नवतीत्यस्यावश्यमनूद्यपत्ते नवतीत्यंशोव्यर्थ इत्यतः विभाषाश्वेरित्युभयत्रविभाषायांतुयदिविधिमुखे
नप्रवृत्तिस्तर्हिपित्वेवसंप्रसारणविकल्पःस्यात् कित्सुतुयजादित्वाद्वचिस्वपीतिनित्यमेवस्यात् अथप्रतिषेधमुखेनप्रवृत्तिस्तर्हि कित्स्वेवप्रवृत्तिःस्यान्नतुपि
त्सुनचपित्सुविधिमुखेनकित्सुतुनिषेधमुखेनेत्युभयथापिप्रवृत्तिरस्त्वितिवाच्यं वैरूप्यलक्षणवाक्यभेदप्रसंगात् संज्ञाकरणेतुकृतेतत्क्रमानुरोधेननेतिप्रतिषे
धःप्रथमंकित्सुप्रवर्त्तते ततःकिद्विरूपेसर्वस्मिन् लिटिएकरूपंप्रापितेसतिपश्चान्नवतीत्येकरूपेणविधिमुखेनैवप्रवर्त्तते इतीति किंघुसंज्ञावत्स्वरूपमितिवक्त्रा

नवेतिविभाषा। निषेधविकल्पयोर्विभाषासंज्ञास्यात्॥ ॥ ॥ ॥ ॥

स्वरूपस्यसंज्ञामाभूत् तथाहिसतिविभाषाश्वेरित्यस्यनवाशब्दः श्वयतेरादेशःस्यादर्थःस्यात् इतिशब्देतुसतिअर्थःसंज्ञीतिलभ्यते तथाहिलोकेह्यर्थप्रधानः
शब्दःगौरित्ययमाहेत्यादौतुशब्दस्वरूपपरःसंपद्यते व्याकरणेतुस्वंरूपमितिपरिभाषणात्स्वरूपपरत्वमौत्सर्गिकं इतिशब्दसमभिव्याहारेत्वर्थपरतेतिविशेषः
इदमेवेतिशब्दस्यपदार्थविपर्यासकत्वंनामसंज्ञात्वर्थस्यैवनतुविभाषाशब्दस्येतिव्याख्यानस्यहृदयं नतरस्यामित्यादौवैरूप्योद्धारःफलं उभयत्रविभाषाहित
स्सत्रअप्राप्यपूर्वस्यहृक्रोरन्यतरस्यामितिउभयत्रविभाषात्वात् हृक्रोर्णौकर्मकत्वाद्गतिबुद्ध्यादिना अणौकर्त्तुर्णौकर्मत्वेप्राप्ते अर्थांतरेचाप्राप्तेसत्यारंभात् उदाहृते
ऽचनाप्येप्राप्तेतावत् अभ्यवहारयतिसैंधवं विकारयतिसैंधवान् विकारयतिसैंधवैः अप्राप्तेतुहरतिभारंदेवदत्तः हारयतिभारंदेवदत्तं हारयतिभारंदे
वदेवदत्तेन करोतिकटंदेवदत्तः कारयतिकटंदेवदत्तं कारयतिकटंदेवदत्तेनेतिदिक्॥ ॥

अभ्यवहारयतिसैंधवान्॥२॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स्वंरूपंशब्दस्य अग्नेर्ढक् आग्नेयं आङोयमहनः आयच्छते आहते इहअग्निशब्दात् आङ्यमहनएवएतेसंज्ञिनः ननुअग्न्यादिवाच्याङ्गारादेर्ढगादिप्रत्ययोनसंभवतीतिस्वरूपादेवस्यात्प्रातिपदिकादित्याद्यधिकारात् किमनेनसूत्रेणेतिचेत्सत्यं अग्न्यादिशब्दपर्यायेभ्योवह्न्यादिभ्योमाभूदितिसूत्रसारंभः ननुअत्ररूपग्रहणंविनापिस्वशब्देनरूपमेवगृह्यते प्रतीतावुपदेशानपेक्षत्वादसाधारणत्वादंतरंगत्वान्नियतोपस्थितिकत्वाच्च अर्थोहिप्रतीतौसंबंधग्रहणमपेक्षतेपर्यायैरपिप्रत्याय्यत्वात्साधारणः पदज्ञानजन्यबोधविषयत्वाद्बहिरंगः अनुकरणदशायामप्रतीतेरनियतोपस्थितिकश्चेति किमनेनरूपग्रहणेनउच्यते इहशास्त्रेअर्थोपिविवक्षितो

स्वंरूपंशब्दस्याशब्दसंज्ञा। शब्दस्यस्वंरूपंसंज्ञिशब्दशास्त्रीयासंज्ञांतांविना॥ ॥ ॥ ॥

स्यादितिज्ञापनार्थंरूपग्रहणं तेनार्थवद्ग्रहणेनानर्थकस्येत्युपपन्नंभवति तत्रोक्तज्ञापकादर्थोग्राह्यः स्वमितिवचनात्स्वरूपंचेतिसामर्थ्यादर्थवतोरूपस्यग्रहणंतेनकाशेकुशेइत्यत्रशेइत्ययंप्रगृह्यसंज्ञोनभवति प्राङ्ग्राहोढ इत्यत्र तुऊढग्रहणेन ऊढंतमेवगृह्यतेनतुक्तवत्वंतस्यैकदेशइत्यन्यत्रविस्तरः अशब्दसंज्ञेतिकिं उपसर्गेघोःकिः दाधाघ्वदाप् इत्यस्मात् घुधातोः शब्दार्थकान्माभूत् नचदाधाघ्वितिघुसंज्ञाकरणसामर्थ्यादेवदाधाभ्यः किः स्यादितिवाच्यं घुमास्थेत्यादिना आतईत्वविधौसंज्ञाकरणसावकाशतया सामर्थ्योपक्षयात् इहशब्दस्यसंज्ञाशब्दसंज्ञेतिनषष्ठीसमासः कर्मकरणमित्यादिष्वर्थसंज्ञासुस्वरूपग्रहणापत्तेः किंतुशब्दः शब्दशास्त्रंतत्रसंज्ञाशब्दसंज्ञेतिसप्तमीसमासस्तदाह शास्त्रीयासंज्ञेति॥ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तत्वबो०

येनविधिः विधिरित्यत्रोपसर्गेघोः किरिति कर्मणि किप्रत्ययः येनेति करणे तृतीया न तु कर्तरि तस्याः कृद्योगषष्ठ्या बाधात् नचोभयप्राप्तौ कर्मणीति नियमेन निर्वाहः कर्मण उक्तत्वेनोभयप्राप्त्यभावात् तथा चात्र करणे तृतीयैव करणं च परतंत्रं कर्त्रधिष्ठितस्यैव करणत्वात् एवं चेह तृतीयया पारतंत्र्यं लभ्यते नच एरजित्यादावविकारादीनां पारतंत्र्यं धात्वादीनां च स्वातंत्र्यं वा स्यादनामिव तद्धितादीनामिव संनवति किंतु वैवक्षिकं तेन विशेषणमप्रधानं तच्चात्मा तस्य संज्ञेति फलितं तदेतदाह विशेषणं तदंतस्येति स्वस्य चेति स्वरूपमित्यनुवर्त्तेरेतल्लभ्यते एरच् इकारान्तादिकाररूपाच्च धातोरच् चयः जयः अयः समासप्रत्ययविधाविति कष्टश्रितः

येनविधिस्तदंतस्य विशेषणंतदंतस्य संज्ञा स्यात्स्वस्य च रूपस्य समासप्रत्ययविधौ प्रतिषेधः उगिद्वर्णग्रहणंवर्जयित्वा ॥

कष्टश्रितः नेह कष्टमुपश्रितः नडादिभ्यः फक् नडस्य गोत्रापत्यं नाडायनः नेह सौत्रनाडिः अनुशतिकादित्वादुभयपदवृद्धिः उगिद्वर्णेति उगिद्वर्णग्रहणं वर्जयित्वा उगिद्वर्णग्रहणवर्जं द्वितीयायां चेति णमुल् महांतमतिक्रांता अतिमहती महच्छब्दस्य गौरादित्वेप्युपसर्जने षिद्गौरादिङीषोऽप्रवृत्तेरुगितश्चेत्युगिदंतान्ङीप् प्रत्युदाहृतिः नचेह सामर्थ्यात्तदंतविधिः असामर्थ्येऽपि कामं स्यादत्र चरितार्थत्वात् नचैवमिञ्जोर्जित्त्वं व्यर्थमिति वाच्यं बाह्वादिभ्यश्चेत्यत्र यथायथं वृद्ध्याद्युदात्तयोश्चरितार्थत्वात् नचैवमपि औपगविरित्यादावव अत इञ् न तु दाक्षितिरित्यादौ अकारस्येहानर्थकत्वादिति चेन्न वर्णग्रहणे अर्थवद्ग्रहणपरिभाषाया अप्रवृत्तेः॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

विरामोऽवसानं विरमणं विरामः भावे घञ् शब्दानुशासनप्रस्तावादाह वर्णानामिति संज्ञाप्रदेशाश्चावसाने इत्यादयः अत्रावसानेऽपि वृद्धिकृतं पौर्वापर्यमस्त्येव
यथोच्चरितप्रध्वंसिनां नित्यविभुत्वाद्वा वर्णानां यद्वा विरम्यतेऽनेनेति विरामः बाहुलकात्करणे घञ् यदुच्चारणोत्तरं वर्णान्तरं नोच्चार्यते सोऽन्त्यवर्णः अवसान
संज्ञ इत्यर्थः अस्मिंस्तु पक्षे खरवसानयोरिति स्थले कापि सप्तमी विषयेऽनेनाद्रियते खरि रेफस्य विसर्गः अवसाने च रेफस्यानि नीति सुप्तिङन्तं पदं अत्र तदन्तग्रहणमत्र
संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनार्थं तेन ईदूदेद्द्विवचनं प्रगृह्यमिति न द्विवचनान्तस्य प्रगृह्यत्वं अन्यथा कुमार्योरगारं कुमार्यागारमित्य
त्र प्रकृतिभावः स्यात् कथं तर्हि प्रातिपदिकसंज्ञायां कृत्तद्धिताभ्यां तदन्तग्रहणमिति चेत् अत्राहुः कृत्तद्धितेति सूत्रे अर्थवद्ग्रहणमनुवर्त्तते तत्सामर्थ्या
त्तदन्तग्रहणमिति हलोऽनन्तराः संयोगः लघ्वर्थमेकाक्षरायां संज्ञायां कर्त्तव्यायां संयोग इति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं संयुज्यते ऽस्मिन् सम

विरामोऽवसानं। वर्णानामभावोऽवसानसंज्ञः स्यात् परः सन्निकर्षः संहिता। वर्णानामतिशयितः सन्निधिः संहितासंज्ञः
स्यात् सुप्तिङन्तं पदं सुबन्तं तिङन्तं च पदसंज्ञं स्यात् हलोऽनन्तराः संयोगः अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ह्रस्वं लघु
संयोगे गुरु संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् दीर्घं च॥ इति संज्ञाप्रकरणं १

दाये वर्ण इति तेनात्र समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसंज्ञावत्प्रत्येकं तथा हि सति दृषद्भिर्नहिः इत्यत्र वकारं निर्धार्य दकारस्य संयोगान्तलोपः स्या
त् निर्यायादित्यत्र यकारः संयोग इति वान्यस्य संयोगादेरिति एत्वं स्यात् सिद्धान्ते त्वचोरहाभ्यामिति द्वित्वे सत्यपि तस्यासिद्धत्वादेवमत्र न भवति हल इति जातौ बहु
वचनं जात्याख्यायामेकस्मिन्निति वचनात् तेन द्वयोरपि संयोगसंज्ञा भवतीति शिक्षेत्यादौ गुरोश्च हल इत्यप्रत्ययः सिद्धः इति यत्र बहवो हलः संश्लिष्टास्तत्र द्व
योर्बहूनां वा विशेषेण संज्ञेति स्थितमाकरे यदि तु बहूनामेव स्यात्तर्हि गोमान्करोतीत्यत्र मसुपस्तकारस्य संयोगान्तलोपो न स्यादिति दिक् हलः किं तितउ
नाऽत्र तत्तनोउन्दु सन्वद्वेति उप्रत्ययः सन्वद्भावाद्द्वित्वं सन्यत इति इत्वं च यस्तोऽच्चारणसामर्थ्याद्गुणाभावः यदि त्वचोरप्यनन्तरयोः संयोगसंज्ञा स्यात्तर्हि
हसंयोगान्तस्येति सकारलोपः स्यात् अनन्तरा इति किं पनसं यदि ह सकारमकारयोः संयोगसंज्ञा स्यात्तर्हि स्कोरिति सलोपः स्यात्॥ ॥

इति संज्ञाप्रकरणम्॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

इकोगुणवृद्धी गुणवृद्धिशब्दाभ्यामिति एतच्च पूर्वसूत्रात्मांगुणवृद्धिपदद्वयमनुवर्त्त्यगुणोवृद्धिरितियेगुणवृद्धी इतियोजनयालभ्यते तेनेहनद्यद्विवञ्चोनु द्यौः सदादीना
मः इमपष्ठ्यन्तमिति सूत्रेषष्ठ्यन्ततस्यानुकरणाच्छब्दस्वरूपपरतयानपुंसकात्स्वमोर्लुगितिभावः पदमिति तच्चसन्नवतिसामानाधिकरण्येपइगन्तस्यांगस्येत्यादि
क्रमेणसंबध्यते मिदेर्गुणः मृजेर्वृद्धिरित्यादौतुसामानाधिकरण्यासंभवात्मिदिमृजोरवयवस्येकइति संबध्यते यत्तुइकइवस्थानेस्तुइतिप्राचांव्याख्यानं य
च्चतद्वीकाकृतोक्तं अनियमप्रसंगेनियमार्थमिदमित्यादितत्सर्वभाष्यविरोधादुपेक्ष्यं तच्छषपत्तंदूषयित्वापदोपस्थितिपक्षस्यैवभाष्येसमर्थितत्वादित्याहु त
छषपत्तेऽपिदूषणोद्धारस्तुभाष्यकौस्तुभेस्पष्टीकृतोस्माभिः॥ ॥
इकोगुणवृद्धी गुणवृद्धिशब्दाभ्यांयत्रगुणवृद्धी विधीयेतेतत्रेकइतिषष्ठ्यन्तंपदमुपतिष्ठते॥ ॥ ॥ ॥ ॥

इकोगुणवृद्धी यत्रसाक्षात्स्थानीननिर्दिष्टः सार्वधातुकार्द्धधातुकयोः सिचिवृद्धिरित्यादौतत्रैवेयंपरिभाषाप्रवर्त्ततेनाचोञ्णितीत्यादौस्थानिनिर्देशात् गु
णवृद्धिशब्दाभ्यामिति एतच्चपूर्वसूत्रात्मांगुणवृद्धीपदद्वयमनुवर्त्त्यगुणोवृद्धिरितियेगुणवृद्धी इतियोजनयालभ्यते तेनेहनत्यदादीनामः इम द्यौः विधीयतेइति
यत्रत्वनुवादोविधिर्यस्याचामादिरित्यादौतत्रेकइतिनोपतिष्ठते अनुवादेपरिभाषाणामनुपस्थितेरितिभावः अनुवादेपरिभाषाणांमित्युपस्यानुद्यमानवि
विशेषणेष्वित्यर्थः अनुपस्थितौलिंगंचोदिचामातःस्थानइत्यत्रस्फुटीकरिष्यते षष्ठ्यन्तमिति सूत्रेषष्ठ्यन्ततस्यानुकरणात्तच्छब्दस्वरूपपरतयानपुंसकात्स्मोर्लु
किमत्वसतस्यतिदीर्घेनेतिभावः पदमिति तच्चसन्नवतिसामानाधिकरण्येपनवसंबध्यतेनवयधिकरण्येन नेनह्रस्वोनपुंसकइत्यतोनिपातिकात्त्वह्रस्वः श्री
इगन्तस्यांगस्येत्यादिक्रमेणसंबध्यते मिदेर्गुणः मृजेर्वृद्धिरित्यादौतुसामानाधिकरण्यासंभवात्मिदिमृजोरवयवस्येकइतिसंबध्यते॥ ॥ ॥ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अचश्च ह्रस्वदीर्घप्लुतादि एतच्च ऊकालोऽज्झिति सूत्रादनु ह्रस्वदीर्घप्लुत इत्यनुवर्त्य ह्रस्वो दीर्घः प्लुत इति योजितियोजनया लभ्यते इत्युक्तत्वादिति किं दिव उत् द्युभ्यां अत्र न
अचिमित्तौ अष्टौ अष्टाभ्य औशित्यत्र कृतात्वनिर्देशात् ज्ञापकाज्झलुभ्यामो विषये प्रवर्त्तमानस्याष्टन इत्यात्वस्याच्चः स्थानिकत्वे सति नेतात्सिद्धो दितिदिक् प
ष्ठ्यन्तपदमिति तच्च सति संभवे सामानाधिकरण्येनैव संबध्यते न वैयधिकरण्येन तेन ह्रस्वो नपुंसक इत्यंजन्तप्रातिपदिकस्यैव ह्रस्वः श्रीपनेह सुवाग्ब्राह्मण
कुलं ग्रामाम् अष्टानां दीर्घ इत्यत्र तु सामानाधिकरण्यासंभवात् ग्रामादीनामच इति संबध्यते तेन ग्रामणी इत्यादि सिद्धं वाक्यस्य टेः प्लुत इत्यत्र सामानाधिकरण्ये
संभवेपि टेर्ग्रहणसामर्थ्यादेव अवयवषष्ठी च प्लुत इति व्याख्यायते अमथ अलोंमस्याचश्चेतिपरिभाषाभामेहिह्व भेत्यादिवाक्यात्सयाचः प्लुतसिद्धेः किम

अचश्च ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच इति षष्ठ्यन्तं पदमुपतिष्ठते आद्यन्तौ टकितौ टित्कितौ यस्यो
क्तौ तस्य क्रमादाद्यन्तावयवौ स्तः अच इति निर्धारणे षष्ठी

मिदचोऽन्त्यात्परः १

नेनेटो ग्रहणेन तेन आयुष्मानेधि इ्ध्वर्मने इत्यादि सिध्यतीति दिक् आद्यन्तौ टकितौ भविता आर्द्धधातुकस्येट् पाययति शाच्छासाह्वेत्यादिना युक् पुरस्तादपवा
दन्यायेन स्थानेयोगत्वस्यायमपवादः प्रत्ययः परश्चेत्यनेन तु परत्वमेव बाधते तेन चरेष्टः गापोष्टक् इत्यादयः पर एव भवंति मिदचोऽन्त्यात्परः स्थानेयोगत्व
स्य परश्चेति परत्वस्य चायमपवादः यशांसि वनानि नपुंसकस्य झलच इति नुम् रुणद्धि रुधादिभ्यः श्नम् ननु पूर्वयोगवदयमपि पुरस्तादपवादन्यायेन स्था
नेयोगमात्रस्यापवादोऽस्त्विति चेत् न बाधसामान्यचिन्तामाश्रित्यस्त्व विषयप्राप्तं सर्वं बाधत इति ह्यभ्युपगमात् अन्यथा मस्जिनशोर्झलीति नुम् अपि करणं व्यर्थं स्यात् न
च अवणार्थं एवमकारः स्यादिति वाच्यं तरणह्रम इति निर्देशात् ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अचांमध्य इति यत्तु प्राचोक्तं अंत्यादचः पर इति तन्न श्रोमुचादीनामित्यादावंत्यास्याऽचोऽसंभवात् तस्यैवांतावयव इति तेनन्त्रं पूणीत्यादौ अंगास्नांतत्वे अ नदीर्घः सिद्धः परादित्वेन सिद्धेः अनक्तत्वेवहं लिह इत्यत्र वहाम्रेलिह इति खसिअरुद्विषदिति मुमोऽनुस्वारो न स्यात् अपदांतत्वात् यत्तु अनक्तत्वेन्त्रं पूणीति दीर्घो न स्यादिति तत्तदादिग्रहणसामर्थ्यमिति अंगसंज्ञासूत्रस्थवार्त्तिकेनैव दूषितप्रायम् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अचांमध्ये योंत्यस्तस्मात्परस्तस्यैवांतावयवो मित्स्यात् ॥ ॥ ॥

अचांमध्ये इति सप्तेजात्यनिर्धारणे च इत्येकवचनमिति भावः अचांमध्य इति किं मुंचति लुंपति अंत्यादचः परो मित्स्यादिति प्राचो व्याख्यायां नैतत्सिद्ध्येत् श्रोमुचादीनामित्यत्रांत्यस्याचोऽसंभवनमित्यपरिताषायाः अनुपस्थितिप्रसंगात् अन्ये तु अचोंत्यात्परो मित् स्यादिति व्यस्यासेनयोजयित्वा प्राचो व्याख्यामपि कथंचित्समर्थयंते पूर्वसूत्रादंत इत्यनुवर्त्तनएकदेशास्वरितत्वप्रतिज्ञानादत्तोव्याचष्टे अंतावयव इति तेन वारीणीत्यादावंगस्नांतत्वेन दीर्घः सिद्धः परादित्वेनाति व्याप्ते अनक्तत्वेतु वहंलिह इत्यत्र वहाम्रेलिह इति खसिअरुर्द्विषदिति मुमिमोनुस्वारो न स्यादपदांतत्वादिति भावः यत्तु केश्चिदुक्तं अनक्तत्ववारीणीति दीर्घो न स्यादिति तत्तदादिग्रहणं स्यादित्यनुमर्थमिति अंगसंज्ञासूत्रस्थवार्त्तिकेनैव दूषितप्रायं ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स्थानेयोगेति स्थानेनयोगोस्याइतिविग्रहः निपातनादेत्वं अनेकविधमितिस्थानार्थगुणप्रमाणकृतमित्यर्थः बलीयइति तेन श्वेताश्वेतेत्यत्र प्रमाणतआं
तर्यवानकारोनेतिभावः

षष्ठीस्थानेयोगा अनिर्द्धारितसंबंधविशेषाषष्ठीस्थानेयोगाबोध्या स्थानेचप्रसंगः स्थानेन्तरतमः प्रसंगेसतिसदृशतमआ
देशः स्यात् यत्रानेकविधमांतर्यंतत्रस्थानतआंतर्यंबलीयः ॥ ॥

षष्ठीस्थानेयोगा स्थानेनयोगोस्याइतिविग्रहः निपातनादेत्वंषष्ठ्याः संबंधमात्रवाचित्वेपीहशास्त्रेयाषष्ठीसास्थानेयोगाबोध्या किमविशेषेणनेत्याह अनिर्द्धारि
तसंबंधविशेषेति अनिर्द्धारितेतिकिं ऊदुपधायागोहः शासइदङ्हलोरित्यादाउपधासंनिधानेनावयवषष्ठीति निर्णीतगोहः शासइत्यादौमाभूत सतिहितत्रा
पिस्थानेयोगत्वेगोहिशासिस्थानेधातुमात्रस्योपधायाश्चस्थानेउदितौस्यातामितिदिक् स्थानेचप्रसंगइति नचास्यप्रसंगार्थकत्वेविवदितव्यदर्नीणास्था
नेशारः प्रसारितव्यमित्युक्ते इग्णांप्रसंगइतिप्रतीते एवंच इकोयणचीत्यादाविगुच्चारणप्रसक्तौयणुच्चारणीयइत्यर्थः संपद्यते स्थानेन्तरतमइति अर्थात्प्र
प्रमाणानांमध्यएव अतएवगंगोदकमित्यत्र त्रिमात्रओकारोनइहस्थानेइत्यनुवर्त्तमानेपुनःस्थानग्रहणादन्योपिवाक्यार्थः संमतः ताल्वादिरूपस्थानेआं
तरतमस्तत्रयुक्तो तर्यवानितियावत् सप्राप्यमाणानांमध्येस्यादिति तदेतदाह यत्रानेकविधमितिस्थानार्थगुणप्रमाणतश्चतुर्विधमित्यर्थः स्थानतो
यथा दध्यत्र तालुस्थानस्येकारस्यतालुस्थानोयकारः अर्थतोयथा वातंड्ययुवति वतंडस्यापत्यंस्त्रीतिगोत्रापत्येयञ्‌ततःस्त्रियामितिलुक् शार्ङ्ग
रवाद्यञोङीन् वतंडीचासौयुवतिश्चेतिविग्रहेपोटायुवतीत्यादिनासमासः पुंवत्कर्मधारयेत्यतिदिष्टपुमान् पुंप्रकृतिवतंडापत्यवाचिनोवतंडशब्दस्यतदप
त्यवाचीवातंड्यशब्दोभवति नतुवतंडादिः गुणतोयथा वाग्घरिः घोषवतोमहाप्राणस्यतादृशएवघकारः प्रमाणतोयथा अमुं अमू अमून् अदसोसेरित्य
नेनह्रस्वस्यह्रस्वोदीर्घस्यदीर्घउकारः तमपूग्रहणंकिं वाग्घरिरित्यत्रझयोहोन्यतरस्यामितिपूर्वसवर्णेक्रियमाणेमहाप्राणत्वसाम्येनद्वितीयोनादवत्वसाम्येन
तृतीयश्चमाभूत किंतुनादवान्महाप्राणश्चतुर्थोघएवयथास्यादिति बलीयइति तेनश्चेताश्वेतेत्यत्रप्रमाणतआंतर्यवानकारोनेतिभावः ॥ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तस्मिन्निति सप्तम्यंतानामनुकरणं निःशब्दो नैरंतर्यपरः दिशिरुच्चारणक्रियः अचियणित्सुत्रेऽव्यवहिते व्यवहिते च सति प्राप्ते अव्यवहित एवेति पूर्वस्यापरस्य
च प्राप्ते पूर्वस्यैवेति च नियम्यते अव्यवहितस्येति तु फलितार्थकथनं परस्य यदिति तस्मादित्युत्तरस्यादेरिति तु न सत्रितं आदेरित्यस्य शसः सर्वादेशत्वबाधक
त्वापत्तेः सिद्धांततु परत्वात्सर्वादेशत्वं बाधकमित्यनुपदमेव वक्ष्यत्ति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्मिन्निति निर्दिष्टे पूर्वस्य सप्तमीनिर्देशेन विधीयमानं [illegible] कार्यं वर्णांतरेणाव्यवहितस्य पूर्वस्य ज्ञेयं तस्मा
दित्युत्तरस्य पंचमीनिर्देशेन क्रियमाणं कार्यं वर्णांतरेणाव्यवहितस्य परस्य बोद्धव्यं

तस्मिन्निति सप्तम्यंतानुकरणमिदं निःशब्दो नैरंतर्यपरः दिशिरुच्चारणक्रियः अचियुणित्सुत्रेऽव्यवहिते व्यवहिते च सति प्राप्तमव्यवहित एवेति पू
र्वस्य परस्य च प्राप्ते पूर्वस्यैवेति च नियम्यते अव्यवहितस्येति फलितार्थकथनं पूर्वस्यैवेति किं दध्युदकं अत्रोकारस्य मा भूत् अव्यवहितस्येति किं अ
ग्निचिदत्र सोमसुदत्र व्यवधानं चात्र वर्णकृतमेव निषिध्यते न तु कालकृतं संहिताधिकाराज्ञापकात् अन्यथा निर्दिष्टग्रहणादेवासंहितायां यणादि
प्रसंगात् किं तेन संहिताधिकारेणातो व्याचष्टे एवं च संहिताधिकारबहिर्भूतविधयः कालव्यवायेऽपि भवंति तेन अग्ना३ विष्णू३ इत्यग्ना३ विष्णू३ इत्यादावव ग्र
हणानङ् ऋतो द्वंद्वे देवताद्वंद्वे चेत्यादिना उत्तरपदपरतो विहिता आनङ् आद्योन्नवतीति दिक् तस्मादिति उत्तरस्य किं तिङ् तिङ इति निघात उत्तरस्यैव यथा
स्यात् अग्निमीळे नेह ईळे अग्निं अव्यवहितस्येति एतच्च निर्दिष्टग्रहणानुवृत्त्या लभ्यते तेन उत्सस्थानं उत्संस्तंभनं मित्यादौ उदस्थेति पूर्वसवर्णो न
प्रवर्त्तते ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

अनेकाल्शित उदाहरणमिदम इश् इतः यत्तु वृत्तिकृता जश्शसोः शिरित्युदाहृतं तत्र सर्वादेशतायाः प्राक् शित्वस्यैवाभावात् तत्र हि डाणलोरिव आ-
नुपूर्व्यादनेकाल्त्वेनैव सर्वादेशत्वमिति सिद्धांतः ॥

अलोंत्यस्य षष्ठीनिर्दिष्टोंत्यस्यादेशः स्यात् ङिच्च ङिदयमप्यंत्यस्य स्यात् सर्वस्येत्यस्यापवादः आदेः परस्य पर-
स्य यद्विहितं तत्तस्यादेर्बोध्यं अलोंत्यस्येत्यस्यापवादः अनेकाल्शित्सर्वस्य स्पष्टं अलोंत्यस्येत्यस्यापवादः

अलोंत्यस्य स्थानषष्ठीनिर्दिष्टस्य य उच्यते सोंत्यस्याल स्थाने स्यादित्यर्थः स्यदादीनामः सः यः स्थानषष्ठीति किं आर्द्धधातुकस्येट्त च रुकारात्पूर्वो मा-
भूत् इदं च षष्ठी स्थान इत्यनुवृत्त्या लभ्यते अल इति किं पदस्येत्यधिकृत्य विधीयमानं वसुस्रंस्विति दत्वं परमानडुन्नामित्यादावंत्यस्य पदस्य मा भूत् ङि-
च्च अयमपीति अवहुस्फोरायनस्य गवाग्र अनडुहो सखा परस्य यदिति तस्मादित्युत्तरस्यादेरिति तु न सत्त्वेत आदेरित्यंशस्य सर्वादेशबाधकत्वापत्तेः सि-
द्धांते तु परत्वात्सर्वादेशत्वं बाधकमित्यनुपपन्नमेव वसति आदेर्बोध्यमिति आदेरलो बोध्यमित्यर्थः अल इत्यनुवर्त्तते अनेकाल् अस्तेर्भूः यत्न्वान-
नुनिर्दिश्यमानस्यादेशा न वा तीत्यनेकालादेशस्य सर्वादेशत्वं सिध्यति तत्किमनेकाल्ग्रहणेन न चालोंत्यस्येत्यस्य स्यादिति शंक्यं ङिच्चेत्यस्य
नियमार्थत्वाभ्युपगमात् उच्यते अनेकाल्ग्रहणाभावे रामैरित्यादावेव सादेशः आदेः परस्येति मकारस्यैव स्थाने स्यात् न तु सर्वस्य स्थान इति दिक्
शित उदाहरणं इदम इश् इतः ॥ ॥ ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri